शक्यतावच्छेदकं, त्रि, (शक्यताया अवच्छेदकम्।) शक्यांशे भासमानधर्म्मः। यथा।
"एवञ्च तादृशधर्म्मस्य शक्यतावच्छेदकत्वं दुर्व्वारमेव।" इति शक्तिवादः॥

शक्रः, पुं, (शक्नोति दैत्यान् नाशयितुम्। शक + "स्फायितञ्चीति।" उणा० २।१३। इति रक्।) इन्द्रः। इत्यमरः॥ (यथा, रघुः। ३। ३९।
"धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः॥")
कुटजवृक्षः। अर्ज्जुनवृक्षः। इति मेदिनी॥ ज्येष्ठानक्षत्रम्। यथा,—
"शक्रो निरृतिस्तोयं विश्वविरिञ्चौ हरिर्वसुर्व्वरुणः।
अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्॥"
इति ज्योतिस्तत्त्वम्॥
चतुर्द्दशेन्द्रा यथा,—
"विश्वभुक् च विपश्चिच्च सुवित्तिः शिविरेव च।
विभुर्मनोजवश्चैव तथौजस्वी वड़िस्तथा॥
अद्भुतश्च तथा शान्तिस्तथा देवचरो वृषः।
ऋतधामा दिवः स्वामी शुचिः शक्राश्चतुर्द्दश॥"*
ब्राह्मदिनमासाब्देषु इन्द्राणां नाशसंख्या यथा।
"ब्राह्मे दिने वै नश्यन्ति चतुर्द्दश पुरन्दराः।
शतानि मासि चत्वारि विंशत्या सहितानि च।
अब्दे पञ्चसहस्राणि चत्वारिंशच्छतानि च॥"
इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः॥*॥
इन्द्रत्वप्राप्तिकारणं यथा,—
इन्द्र उवाच।
"रमाकान्तभवत्प्रीत्यै कृतं क्रतुशतं पुरा।
तेन पुण्येन सम्प्राप्तं मया पौरन्दरं पदम्॥
इदानीं नूतनः कोऽपि जातो दिवि पुरन्दरः।
न तेन धर्म्मो विहितो न तेन क्रतवः कृताः।
मम सिंहासनं दिव्यं कथमाक्रान्तमच्युत॥
इत्येवं वदतस्तस्य श्रुत्वा वाक्यं रमापतिः।
उन्मीलितस्मिताक्षोऽसावुवाच मधुरं वचः॥
श्रीभगवानुवाच।
देवादयो मनुष्यान्ता मम सेवापरायणाः।
मद्याजनरता लोका मद्भक्तिस्तुतिपाठकाः॥
मन्मूर्त्तिषु कृतध्याना मत्कथाश्रवणा इह।
मत्पादोदकनैवेद्यभोजिनोऽन्वहमेव ये॥
मन्नामकीर्त्तनपरा मम स्मृतिपरायणाः।
मन्मन्त्रजापका नित्यमनन्याश्रयसम्पदः॥
किं विधित्वं किमिन्द्रत्वं देवत्वमपरं किमु।
तेषामलभ्यं यत्किञ्चित् दुर्लभं नास्ति संसृतौ॥
किं दानैरल्पफलदैः किं तपोभिः किमध्वरैः।
सेव्यमानैः क्षितितले स मम प्रीतिमान् सदा॥
इन्द्र उवाच।
भगवन् कर्म्मणा केन स त्वत्प्रीतिपरो भवेत्।
तद्वदस्व महाबाहो प्रपन्नभयभञ्जन॥
श्रीभगवानुवाच।
अनेकधा मद्भजनं मम प्रीतिकरं परम्।
यद्भक्त्या तत् पदं लेभे तत् शृणुष्व पुरन्दर॥
जपत्यष्टादशाध्यायगीतानां श्लोकपञ्चकम्।
तया भक्त्या तु संप्राप्तं तव साम्राज्यमुत्तमम्॥"
इति पाद्मोत्तरखण्डे ९६ अध्यायः॥
(समर्थे, त्रि। यथा, ऋग्वेदे। ४। १६। ६।
"विश्वानि शक्रो नर्य्याणि विद्वा-
नपो रिरेच सखिभिर्निकामैः॥"
"विद्वान् जानन् शक्रः समर्थ इन्द्रः।" इति तद्भाष्ये सायणः॥)

शक्रक्रीड़ाचलः, पुं, (शक्रस्य क्रीड़ाचलः क्रीड़ापर्व्वतः।) सुमेरुपर्व्वतः। इति हलायुधः॥

शक्रगोपः, पुं, इन्द्रगोपकीटः। इति जटाधरः॥ (यथा, हरिवंशे। ६६। ५।
"नववर्षावसिक्तानि शक्रगोपाकुलानि च।
नष्टदावाग्निमार्गाणि वनानि प्रचकाशिरे॥")

शक्रजः, पुं, (शक्राज्जायते इति। जन + डः।) काकः। इति त्रिकाण्डशेषः॥ इन्द्रजाते, त्रि॥

शक्रजातः, पुं, (शक्राज्जातः।) काकः। इति शब्दरत्नावली॥ इन्द्रजाते, त्रि॥

शक्रजित्, पुं, (शक्रं जितवानिति। जि + क्विप्।) रावणपुत्त्रः। इति त्रिकाण्डशेषः॥ (यथा, रघुः। १४। ८३।
"अपि प्रभुः सानुशयोऽधुना स्यात्
किमुत्सुकः शक्रजितोऽपि हन्ता॥")
इन्द्रजेतरि, त्रि,॥

शक्रद्रुमः, (शक्रस्य पुं द्रुमः।) देवदारुवृक्षः। इति भावप्रकाशः॥

शक्रधनुः, [स्] क्ली, (शक्रस्य धनुः।) इन्द्रधनुः। इत्यमरः॥ गण्डी इति रामधनुक इति च भाषा।
"इन्द्रायुधं शक्रधनुः कौशिकायुधमित्यपि।
ऐरावतं रोहितं स्यादवक्रं यदि तद्धनुः॥"
इति शब्दरत्नावली।
(यथा, महाभारते। ५। २६। ११।
"यथाकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च विद्म किन्नु तत्॥")

शक्रध्वजः, पुं (शक्रस्य ध्वजः।) इन्द्रध्वजः। (यथा, आर्य्यासप्तशत्याम्। २६९।
"ते श्रेष्ठिनः क्व सम्प्रति शक्रध्वज! यैः कृतस्तवोच्छ्रायः।
ईषां वा मेढिं वाधुनातनास्त्वां विधित्सन्ति॥")
तद्विवरणं यथा,—
नृपवाहन उवाच।
"भगवन् श्रोतुमिच्छामि तस्य उत्थापनं यथा।
क्रियते दिन ऋक्षे च द्रव्यमन्त्रविधिं वद॥
अगस्त्य उवाच।
ब्रह्मणा कथितं शक्र बृहस्पतिसमीपतः।
यथा तथा प्रवक्ष्यामि विधिं केतोः समुच्छ्रये॥
बृहस्पतिरुवाच।
शुभाहे ऋक्षे करणे मुहूर्त्ते शुभमङ्गले।
दैवज्ञः सूत्रधारश्च वनं गच्छेत् सहायवान्॥
देवीप्रतिष्ठाविधिना यात्रायां या प्रचोदिता।
गत्वा वृक्षं शुभं पुष्पं धवार्ज्जुनप्रियङ्करम्॥
उडुम्बराजकर्णञ्च पञ्चैते शोभना हरेः।
ध्वजार्थे वर्जयेद्वत्स देव उद्यानजान् द्रुमान्॥
कन्या मध्ये तु या यष्टेः करमानेन कल्पयेत्।
एकादशकरा वत्स नव पञ्च करापरा॥
अरालतां कृमिचितां तथा पक्षिनिकेतनाम्।
वल्मीकपितृवनजां सुशुष्ककोटरान्तराम्॥
कुब्जाञ्च घटसिक्ताञ्च तथा स्त्रीनामगर्हिताम्।
विद्युद्वज्रहताञ्चैव दग्धाञ्च परिवर्जयेत्॥
अलाभे चन्दनं आम्रं शालशाकमयं तथा।
कर्त्तव्यं शक्रचिह्नार्थे न चान्यं वृक्षजं क्वचित्॥
शुभभूमिभवं ग्राह्यं शुभतोयं शुभावहम्।
ततः संपूजयेद्वृक्षं प्राङ्मुखोदङ्मुखोऽपि वा॥
नमो वृक्षपते वृक्ष त्वामर्च्चयति पार्थिवः।
ध्वजार्थं तत्त्वतो नाथ अन्यथा उपगम्यताम्॥
रात्रौ देयो बलिस्तत्र युगवृक्षे तथैव च।
वासवानां महावृक्षं कृत्वा चान्यत्र गम्यताम्॥
ध्वजार्थे देवराजस्य न क्षान्तिस्तव अत्र च।
पूजयित्वा ततो वृक्षं बलिं भूताय दापयेत्॥
प्रभाते छेदयेद्वृक्षं शुभस्वप्नादिदर्शनैः।
शुक्लाम्बरधरश्चैव समुद्रतरणं नदी॥
वृक्षान् नम्रान् शुभान् चौरानारोहेत् देवतालयम्।
देवो द्विजस्तथा साधुलिङ्गब्रह्म हरेरपि॥
प्रतिमा पूजिता स्वप्ने क्षिप्रं सिद्धिफलप्रदा।
मत्स्यमांसदधिलाभं रुधिरं मृतरोदनम्॥
अगम्यागमनं दृष्ट्वा आशु सिद्धिफलप्रदम्।
द्रुमांस्तिलं धनं धान्यं शत्रुनाशं यथा शुभम्॥
फलं पुष्पं सिता दूर्व्वा स्वप्ने लब्धा जयावहाः।
शङ्खगावस्तथा दन्तिलाभा राज्यप्रदायकाः॥
गौः सवत्सा नवसुता दृष्टा पुत्त्रफलप्रदा।
पङ्कस्योद्धरणं कूपे व्याधिमोचकरं चिरात्॥
एवं स्वप्नान् शुभान् दृष्ट्वा तथा छिन्देत पादपम्।
उदङ्मुखः प्राङ्मुखो वा मधुवच्चात्तपशंना॥
पूर्व्वोत्तरे च पतनं शस्तोऽशब्दोऽव्रणः शुभः।
अलग्नपादपे चान्ये अन्यथा तु परित्यजेत्॥
अष्टाङ्गुलं त्यजेत् मूले अग्रे तन्तु जले क्षिपेत्।
तथा तमानयेद्वत्स शकटेन वृषैरपि॥
युवानैर्बलसम्पन्नैर्नेयं तत्पुरतः परम्।
नीयमाना यदा यष्टी समा वा चतुरस्रका॥
हन्ता वा भङ्गमाधत्ते राज्ञः पुत्त्रं पुरोहितम्।
आरभङ्गे बलं भिन्द्याद्राज्यनाशं क्षयं तथा॥
अर्थस्य अक्षभङ्गेन शान्तिन्तत्र तु कारयेत्।
इन्द्रजैच्छत्रमन्त्रेण जातदेवसमापि वा॥
तथा नीत्वा शुभे लग्ने पुरस्तादुपवेशयेत्।
द्वारशोभां पथरथ्या गृहे हट्टे च कारयेत्॥
यदा पटहनादाद्य वेश्याशङ्खद्विजातयः।
सङ्कुलैर्वेदशब्दैश्च ता नेया यत्र उच्छ्रयेत्॥
तत्रस्थाश्चित्रकर्म्मार्वानिर्म्मितैस्तान्तु वेष्टयेत्।
वस्त्रै रण्डजरोमोत्थैः शुभैः शुक्लैर्यथाक्रमम्॥
नन्दोपनन्दसंज्ञाश्च कुमार्य्यः प्रथमांशगाः।
देवी जयविजयाख्याः षोड़शांशव्यवस्थिताः॥